# Subala Upanishad

# સુબાલોપનિષત્

## Document Information

Text title : subAlopaniShat

File name : subAla.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Latest update : January 5, 2000

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 25, 2020

*sanskritdocuments.org*

# સુબાલોપનિષત્

॥ અથ સુબાલોપનિષત્ ॥

બીજાજ્ઞાનમહામોહાપહ્નવાધદ્વિશિષ્યતે ।
નિર્બીજં ત્રૈપદં તત્ત્વં તદસ્મીતિ વિચિન્તયે ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ તદાહુઃ કિં તદાસીત્તસ્મૈ સ હોવાચ
ન સન્નસન્ન સદસદિતિ તસ્માત્તમઃ સઞ્જાયતે
તમસો ભૂતાદિર્ભૂતાદેરાકાશમાકાશા-
દ્વાયુર્વાયગ્નિરગ્નેરાપોઽદ્ભ્યઃ પૃથિવી તદણ્ડં
સમભવત્તત્સંવત્સરમાત્રમુષિત્વા દ્વિધાકરો-
દધસ્તાદ્ભૂમિમુપરિષ્ટાદાકાશં મધ્યે પુરુષો
દિવ્યઃ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સહસ્રબાહુરિતિ સોઽગ્રે ભૂતાનાં મૃત્યુમસૃજન્ત્ર્યક્ષરં
ત્રિશિરસ્કં ત્રિપાદં ખણ્ડપરશું તસ્ય બ્રહ્માભિધેતિ
સ બ્રહ્માણમેવ વિવેશ સ માનસાન્સપ્ત પુત્રાનસૃજત્તેહ
વિરાજઃ સત્યમાનસાનસૃજન્તેહ પ્રજાપતયો બ્રાહ્મણોઽસ્ય
મુખમાસીદ્બાહૂ રાજન્યઃ કૃતઃ ।
ઊરૂ તદસ્ય યદ્વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥

ચન્દ્રમા મનસો જાતશ્ચક્ષોઃ સૂર્યો અજાયત ।
શ્રોત્રાદ્વાયુશ્ચ પ્રાણશ્ચ હૃદયાત્સર્વમિદં જાયતે ॥

ઇતિ પ્રથમઃ ખણ્ડઃ ॥

અપાનાન્નિષાદા યક્ષરાક્ષસગન્ધર્વાશ્ચાસ્થિભ્યઃ

પર્વતા લોમભ્ય ઓષધિવનસ્પતયો લલાટાત્ક્રોધજો રુદ્રો
જાયતે તસ્યૈતસ્ય મહતો ભૂતસ્ય નિઃશ્વસિતમેવૈતદૃગ્વેદો
યજુર્વેદઃ સામવેદોઽથર્વવેદઃ શિક્ષા કલ્પો વ્યાકરણં
નિરુક્તં છન્દો જ્યોતિષામયનં ન્યાયો મીમાંસા ધર્મશાસ્ત્રાણિ
વ્યાખ્યાનાન્યુપવ્યાખ્યાનાનિ ચ સર્વાણિ ચ ભૂતાનિ
હિરણ્યજ્યોતિર્યસ્મિન્નયમાત્માધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ॥

આત્માનં દ્વિધાકરોદર્ધેન સ્ત્રી અર્ધેન પુરુષો દેવો ભૂત્વા
દેવાનસૃજદૃષિર્ભૂત્વા ઋષીન્યક્ષરાક્ષસગન્ધર્વાન્-
ગ્રામ્યાનારણ્યાંશ્ચ પશૂનસૃજદિતરા ગૌરિતરોઽનડ્વાનિતરો
વડવેતરોઽશ્વ ઇતરા ગર્દભીતરો ગર્દભ ઇતરા વિશ્વમ્ભરીતરો
વિશ્વમ્ભરઃ સોઽન્તે વૈશ્વાનરો ભૂત્વા સન્દગ્ધ્વા સર્વાણિ
ભૂતાનિ પૃથિવ્યપ્સુ પ્રલીયત આપસ્તેજસિ પ્રલીયન્તે તેજો વાયૌ
વિલીયતે વાયુરાકાશે વિલીયત આકાશમિન્દ્રિયેષ્વિન્દ્રિયાણિ
તન્માત્રેષુ તન્માત્રાણિ ભૂતાદૌ વિલીયન્તે ભૂતાદિર્મહતિ
વિલીયતે મહાનવ્યક્તે વિલીયતેઽવ્યક્તમક્ષરે વિલીયતે અક્ષરં
તમસિ વિલીયતે તમઃ પરે દેવ એકીભવતિ પરસ્તાન્ન સન્નાસન્નાસદ-
સદિત્યેતન્નિર્વાણાનુશાસનમિતિ વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ દ્વિતીયઃ ખણ્ડઃ ॥ ૨॥

અસદ્વા ઇદમગ્ર આસીદજાતમભૂતમપ્રતિષ્ઠિત-
મશબ્દમસ્પર્શમરૂપમરસમગન્ધમવ્યયમ-
મહાન્તમબૃહન્તમજમાત્માનં મત્વા ધીરો ન શોચતિ ॥

અપ્રમાણમમુખમશ્રોત્રમવાગમનોઽતેજસ્કમચક્ષુ-
ષ્કમનામગોત્રમશિરસ્કમપાણિપાદમસ્નિગ્ધમલોહિત-
મપ્રમેયમહ્રસ્વમદીર્ઘમસ્થૂલમનણ્વનલ્પમપાર-
મનિર્દેશ્યમનપાવૃતમપ્રતર્ક્યમપ્રકાશ્યમસંવૃત-
મનન્તરમબાહ્યં ન તદશ્નાતિ કિંચન ન તદશ્નાતિ
કશ્ચનૈતદ્વૈ સત્યેન દાનેન તપસાઽનાશકેન બ્રહ્મચર્યેણ
નિર્વેદનેનાનાશકેન ષડઙ્ગેનૈવ સાધયેદેતત્રયં
વીક્ષેત દમં દાનં દયામિતિ ન તસ્ય પ્રાણા ઉત્ક્રામન્ત્યત્રૈવ
સમવલીયન્તે બ્રહ્મૈવ સન્બ્રહ્માપ્યેતિ ય એવં વેદ ॥

ઇતિ તૃતીયઃ ખણ્ડઃ ॥ ૩॥

હૃદયસ્ય મધ્યે લોહિતં માંસપિણ્ડં
યસ્મિંસ્તદ્દહરં પુણ્ડરીકં કુમુદમિવાનેકધા
વિકસિતં હૃદયસ્ય દશ છિદ્રાણિ ભવન્તિ યેષુ
પ્રાણાઃ પ્રતિષ્ઠિતાઃ સ યદા પ્રાણેન સહ
સંયુજ્યતે તદા પશ્યતિ નદ્યો નગરાણિ બહૂનિ
વિવિધાનિ ચ યદા વ્યાનેન સહ સંયુજ્યતે તદા પશ્યતિ
દેવાંશ્ચ ઋષીંશ્ચ યદાપાનેન સહ સંયુજ્યતે
તદા પશ્યતિ યક્ષરાક્ષસગન્ધર્વાન્યદા ઉદાનેન
સહ સંયુજ્યતે તદા પશ્યતિ દેવલોકાન્દેવાન્સ્કન્દં
જયન્તં ચેતિ યદા સમાનેન સહ સંયુજ્યતે તદા
પશ્યતિ દેવલોકાન્ધનાનિ ચ યદા વૈરમ્ભેણ સહ
સંયુજ્યતે તદા પશ્યતિ દૃષ્ટં ચ શ્રુતં ચ ભુક્તં
ચાભુક્તં ચ સચ્ચાસચ્ચ સર્વં પશ્યતિ અથેમા
દશ દશ નાડ્યો ભવન્તિ તાસામેકૈકસ્ય દ્વાસપ્તતિર્દ્વાસપ્તતિઃ
શાખા નાડીસહસ્રાણિ ભવન્તિ યસ્મિન્નયમાત્મા સ્વપિતિ
શબ્દાનાં ચ કરોત્યથ યદ્દ્વિતીયે સઙ્કોશે સ્વપિતિ તદેમં
ચ લોકં પરં ચ લોકં પશ્યતિ સર્વાઞ્છબ્દાન્વિજાનાતિ
સ સમ્પ્રસાદ ઇત્યાચક્ષતે પ્રાણઃ શરીરં પરિરક્ષતિ હરિતસ્ય
નીલસ્ય પીતસ્ય લોહિતસ્ય શ્વેતસ્ય નાડ્યો રુધિરસ્ય પૂર્ણા
અથાત્રૈતદ્દહરં પુણ્ડરીકં કુમુદમિવાનેકધા વિકસિતં
યથા કેશઃ સહસ્રધા ભિન્નસ્તથા હિતા નામ નાડ્યો ભવન્તિ
હૃદ્યાકાશે પરે કોશે દિવ્યોઽયમાત્મા સ્વપિતિ યત્ર સુપ્તો ન
કઞ્ચન કામં કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ
ન તત્ર દેવા ન દેવલોકા યજ્ઞા ન યજ્ઞા વા ન માતા
ન પિતા ન બન્ધુર્ન બાન્ધવો ન સ્તેનો ન બ્રહ્મહા
તેજસ્કાયમમૃતં સલિલ એવેદં સલિલં વનં ભૂયસ્તેનૈવ
માર્ગેણ જાગ્રાય ધાવતિ સમ્રાડિતિ હોવાચ ॥

ઇતિ ચતુર્થઃ ખણ્ડઃ ॥ ૪॥

સ્થાનાનિ સ્થાનિભ્યો યચ્છતિ નાડી તેષાં
નિબન્ધનં ચક્ષુરધ્યાત્મં દ્રષ્ટવ્યમધિભૂતમાદિત્યસ્તત્રાધિદૈવતં

નાડી તેષાં નિબન્ધનં યશ્ચક્ષુષિ યો દ્રષ્ટવ્યે ય આદિત્યે
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો
હૃદ્યાકાશે ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

શ્રોત્રમધ્યાત્મં શ્રોતવ્યમધિભૂતં દિશસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યઃ શ્રોત્રે યઃ શ્રોતવ્યે યો દિક્ષુ
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો
હૃદ્યાકાશે ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

નાસાધ્યાત્મં ઘ્રાતવ્યમધિભૂતં પૃથિવી તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યો નાસાયાં યો ઘ્રાતવ્યે યઃ
પૃથિવ્યાં યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો
હૃદ્યાકાશે ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

જિહ્વાધ્યાત્મં રસયિતવ્યમધિભૂતં વરુણસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યસ્ત્વચિ યઃ સ્પર્શયિતવ્યે
યો વરુણે યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો
હૃદ્યાકાશે ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમમૃતમભયમશોકમનન્તમ્ ॥

ત્વગધ્યાત્મં સ્પર્શયિતવ્યમધિભૂતં વાયુસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યસ્ત્વચિ યઃ સ્પર્શયિતવ્યે યો વાયૌ
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

મનોઽધ્યાત્મં મન્તવ્યમધિભૂતં ચન્દ્રસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યો મનસિ યો મન્તવ્યે યશ્ચન્દ્રે
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

બુદ્ધિરધ્યાત્મં બોદ્ધવ્યમધિભૂતં બ્રહ્મા તત્રાધિદૈવતં

નાડી તેષાં નિબન્ધનં યો બુદ્ધૌ યો બોદ્ધવ્યે યો બ્રહ્મણિ
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

અહઙ્કારોઽધ્યાત્મમહંકર્તવ્યમધિભૂતં
રુદ્રસ્તત્રાધિદૈવતં નાડી તેષાં નિબન્ધનં
યોઽહઙ્કારે યોઽહંકર્તવ્યે યો રુદ્રે યો નાડ્યાં
યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

ચિત્તમધ્યાત્મં ચેતયિતવ્યમધિભૂતં
ક્ષેત્રજ્ઞસ્તત્રાધિદૈવતં નાડી તેષાં નિબન્ધનં
યશ્ચિત્તે યશ્ચેતયિતવ્યે યઃ ક્ષેત્રજ્ઞે યો નાડ્યાં
યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

વાગધ્યાત્મં વક્તવ્યમધિભૂતમગ્નિસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યો વાચિ યો વક્તવ્યે યોઽગ્નૌ
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

હસ્તાવધ્યાત્મમાદાતવ્યમધિભૂતમિન્દ્રસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યો હસ્તે ય આદાતવ્યે ય ઇન્દ્રે યો નાડ્યાં
યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે ય
એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

પાદાવધ્યાત્મં ગન્તવ્યમધિભૂતં વિષ્ણુસ્તત્રાધિદૈવતં
નાડી તેષાં નિબન્ધનં યઃ પાદે યો ગન્તવ્યે યો વિષ્ણૌ
યો નાડ્યાં યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા

તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

પાયુરધ્યાત્મં વિસર્જયિતવ્યમધિભૂતં
મૃત્યુસ્તત્રાધિદૈવતં નાડી તેષાં નિબન્ધનં
યઃ પાયૌ યો વિસર્જયિતવ્યે યો મૃત્યૌ યો નાડ્યાં
યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપાસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

ઉપસ્થોઽધ્યાત્મમાનન્દયિતવ્યમધિભૂતં
પ્રજાપતિસ્તત્રાધિદૈવતં નાડી તેષાં નિબન્ધનં
ય ઉપસ્થે ય આનન્દયિતવ્યે યઃ પ્રજાપતૌ યો નાડ્યાં
યઃ પ્રાણે યો વિજ્ઞાને ય આનન્દે યો હૃદ્યાકાશે
ય એતસ્મિન્સર્વસ્મિન્નન્તરે સંચરતિ સોઽયમાત્મા
તમાત્માનમુપસીતાજરમમૃતમભયમશોકમનન્તમ્ ॥

એષ સર્વજ્ઞ એષ સર્વેશ્વર એષ સર્વાધિપતિરેષોઽન્તર્યામ્યેષ
યોનિઃ સર્વસ્ય સર્વસૌખ્યૈરુપાસ્યમાનો ન ચ સર્વસૌખ્યાન્યુપાસ્યતિ
વેદશાસ્ત્રૈરુપાસ્યમાનો ન ચ વેદશાસ્ત્રાણ્યુપાસ્યતિ
યસ્યાનમિદં સર્વે ન ચ યોઽન્નં ભવત્યતઃ પરં સર્વનયનઃ
પ્રશાસ્તાન્નમયો ભૂતાત્મા પ્રાણમય ઇન્દ્રિયાત્મા મનોમયઃ
સંકલ્પાત્મા વિજ્ઞાનમયઃ કાલાત્માનન્દમયો લયાત્મૈકત્વં
નાસ્તિ દ્વૈતં કુતો મર્ત્યં નાસ્ત્યમૃતં કુતો નાન્તઃપ્રજ્ઞો
ન બહિઃપ્રજ્ઞો નોભયતઃપ્રજ્ઞો ન પ્રજ્ઞાઘનો ન પ્રજ્ઞો
નાપ્રજ્ઞોઽપિ નો વિદિતં વેદ્યં નાસ્તીત્યેતન્નિર્વાણાનુશાસનમિતિ
વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ પઞ્ચમઃ ખણ્ડઃ ॥ ૫॥

નૈવેહ કિંચનાગ્ર આસીદમૂલમનાધારમિમાઃ
પ્રજાઃ પ્રજાયન્તે દિવ્યો દેવ એકો નારાયણશ્ચક્ષુશ્ચ
દ્રષ્ટવ્યં ચ નારાયણઃ શ્રોત્રં ચ શ્રોતવ્યં ચ
નારાયણો ઘ્રાણં ચ ઘ્રાતવ્યં ચ નારાયણો જિહ્વા ચ
રસયિતવ્યં ચ નારાયણસ્ત્વક્ ચ સ્પર્શયિતવ્યં ચ
નારાયણો મતશ્ચ મન્તવ્યં ચ નરાયણો બુદ્ધિશ્ચ

બોદ્ધવ્યં ચ નારાયણોઽહઙ્કારશ્ચાહંકાર્તવ્યં ચ
નારાયણશ્ચિત્તં ચ ચેતયિતવ્યં ચ નારાયણો વાક્ ચ
વક્તવ્યં ચ નારાયણો હસ્તૌ ચાદાતવ્યં ચ નારાયણઃ
પાદૌ ચ ગન્તવ્યં ચ નારાયણઃ પાયુશ્ચ વિસર્જયિતવ્યં
ચ નારાયણ ઉપસ્થશ્ચાનન્દયિતવ્યં ચ નારાયણો ધાતા
વિધાતા કર્તા વિકર્તા દિવ્યો દેવ એકો નારાયણ આદિત્યા રુદ્રા
મરુતો વસવોઽશ્વિનાવૃચો યજૂંષિ સામાનિ મન્ત્રોઽગ્નિ-
રાજ્યાહુતિર્નારાયણ ઉદ્ભવઃ સમ્ભવો દિવ્યો દેવ એકો નારાયણો
માતા પિતા ભ્રાતા નિવાસઃ શરણં સુહૃદ્ગતિર્નારાયણો વિરાજા
સુદર્શનાજિતાસોમ્યામોઘાકુમારામૃતાસત્યામધ્યમાના-
સીરાશિશુતાસૂરાસૂર્યાસ્વરાવિજ્ઞેયાનિ નાડીનામાનિ દિવ્યાનિ
ગર્જતિ ગાયતિ વાતિ વર્ષતિ વરુણોઽર્યમા ચન્દ્રમાઃ કલા
કલિર્ધાતા બ્રહ્મા પ્રજાપતિર્મઘવા દિવસાશ્ચાર્ધદિવસાશ્ચ
કલાઃ કલ્પાશ્ચોર્ધ્વં ચ દિશશ્ચ સર્વં નારાયણઃ ॥

પુરુષ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્નેનતિરોહતિ ॥

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ॥

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે । વિષ્ણોર્યત્પરમં પદમ્ ॥

તદેતન્નિર્વાણાનુશાસનમિતિ વેદનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ ષષ્ઠઃ ખણ્ડઃ ॥ ૬॥

અન્તઃશરીરે નિહિતો ગુહાયામજ એકો નિત્યો યસ્ય પૃથિવી
શરીરં યઃ પૃથિવીમન્તરે સંચરન્ યં પૃથિવી ન વેદ ॥

યસ્યાપઃ શરીરં યોઽપોન્તરે સંચરન્યમાપો ન વિદુઃ ॥

યસ્ય તેજઃ શરીરં યસ્તેજોન્તરે સંચરન્ યં તેજો ન વેદ ॥

યસ્ય વાયુઅઃ શરીરં યો વાયુમન્તરે સંચરન્ ય વાયુર્ન વેદ ॥

યસ્યાકાશઃ શરીરં ય આકાશમન્તરે સંચરન્ યમાકાશો ન વેદ ॥

યસ્ય મનઃ શરીરં યો મનોન્તરે સંચરન્ યં મનો ન વેદ ॥

યસ્ય બુદ્ધિઃ શરીરં યો બુદ્ધિમન્તરે સંચરન્ યં બુદ્ધિર્ન વેદ ॥

યસ્યાહઙ્કારઃ શરીરં યોઽહઙ્કારમન્તરે સંચરન્ યમહઙ્કારો ન વેદ ॥

યસ્ય ચિત્તં શરીરં યશ્ચિત્તમન્તરે સંચરન્ યં ચિત્તં ન વેદ ॥

યસ્યાવ્યક્તં શરીરં યોઽવ્યક્તમન્તરે સંચરન્ યમવ્યક્તં ન વેદ ॥

યસ્યાક્ષરં શરીરં યોઽક્ષરમન્તરે સંચરન્ યમક્ષરં ન વેદ ॥

યસ્ય મૃત્યુઃ શરીરં યો મૃત્યુમન્તરે સંચરન્ યં મૃત્યુર્ન વેદ ॥

સ એષ સર્વભૂતાન્તરાત્માપહતપાપ્મા દિવ્યો દેવ એકો નારાયણઃ ॥

એતાં વિદ્યામપાન્તરતમાય દદાવપાન્તરતમો બ્રહ્મણે દદૌ બ્રહ્મા ઘોરાઙ્ગિરસે દદૌ ઘોરાઙ્ગિરા રૈક્વાય દદૌ રૈક્વો રામાય દદૌ રામઃ સર્વેભ્યો ભૂતેભ્યો દદાવિત્યેવં નિર્વાણાનુશાસનમિતિ વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ સપ્તમઃ ખણ્ડઃ ॥ ૭॥

અન્તઃશરીરે નિહિતો ગુહાયાં શુદ્ધઃ સોઽયમાત્મા સર્વસ્ય મેદોમાંસક્લેદાવકીર્ણે શરીરમધ્યેઽત્યન્તોપહતે ચિત્રભિત્તિપ્રતીકાશે ગન્ધર્વનગરોપમે કદલીગર્ભવન્નિઃસારે જલબુદ્બુદવચ્ચઞ્ચલે નિઃસૃતમાત્માનમચિન્ત્યરૂપં દિવ્યં દેવમસઙ્ગં શુદ્ધં તેજસ્કાયમરૂપં સર્વેશ્વરમચિન્ત્યમશરીરં નિહિતં ગુહાયામમૃતં વિભ્રાજમાનમાનન્દં તં પશ્યન્તિ વિદ્વાંસસ્તેન લયે ન પશ્યન્તિ ॥

ઇતિ અષ્ટમઃ ખણ્ડઃ ॥ ૮॥

અથ હૈનં રૈક્વઃ પપ્રચ્છ ભગવન્કસ્મિન્સર્વેઽસ્તં ગચ્છન્તીતિ ॥ તસ્મૈ સ હોવાચ ચક્ષુરેવાપ્યેતિ યચ્ચક્ષુરેવાસ્તમેતિ દ્રષ્ટવ્યમેવાપ્યેતિ યો દ્રષ્ટવ્યમેવાસ્તમેત્યાદિત્યમેવાપ્યેતિ ય આદિત્યમેવાસ્તમેતિ વિરાજમેવાપ્યેતિ યો વિરાજમેવાસ્તમેતિ પ્રાણમેવાપ્યેતિ યઃ પ્રાણમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ યો વિજ્ઞાનમેવાસ્તમેત્યાનન્દમેવાપ્યેતિ ય આનન્દમેવાસ્તમેતિ તુરીયમેવાપ્યેતિ યસ્તુરીયમેવાસ્તમેતિ તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

શ્રોત્રમેવાપ્યેતિ યઃ શ્રોત્રમેવાસ્તમેતિ શ્રોતવ્યએવાપ્યેતિ
યઃ શ્રોતવ્યમેવાસ્તમેતિ દિશમેવાપ્યેતિ યો દિશમેવાસ્તમેતિ
સુદર્શનામેવાપ્યેતિ યઃ સુદર્શનામેવાસ્તમેત્યપાનમેવાપ્યેતિ
યોઽપાનમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ યો વિજ્ઞાનમેવાસ્તમેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

નાસમેવાપ્યેતિ યો નાસામેવાસ્તમેતિ ઘ્રાતવ્યમેવાપ્યેતિ
યો ઘ્રાતવ્યમેવાસ્તમેતિ પૃથિવિમીવાપ્યેતિ યઃ પૃથિવીએવાસ્તમેતિ
જિતામેવાપ્યેતિ યો જિતામેવાસ્તમેતિ વ્યાનમેવાપ્યેતિ યો
વ્યાનમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

જિહ્વામેવાપ્યેતિ યો જિહ્વામેવાસ્તમેતિ રસયિતવ્યમેવાપ્યેતિ
યો રસયિતવ્યમેવાસ્તમેતિ વરુણમેવાપ્યેતિ યો વરુણમેવાસ્તમેતિ
સૌમ્યામેવાપ્યેતિ યઃ સૌમ્યામેવાસ્તમેત્યુદાનમેવાપ્યેતિ
ય ઉઅદાનમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

ત્વચમેવાપ્યેતિ યસ્ત્વચમેવાસ્તમેતિ સ્પર્શયિતવ્યમેવાપ્યેતિ
યઃ સ્પર્શૈતવ્યમેવાસ્તમેતિ વાયુમેવાપ્યેતિ યો વાયુમેવાસ્તમેતિ
મોધામેવાપ્યેતિ યો મોધામેવાસ્તમેતિ સમાનમેવાપ્યેતિ
યઃ સમાનમેવાસ્તમેતિ વિજ્ઞાનએવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

વાચમેવાપ્યેતિ યો વાચમેવાસ્તમેતિ વક્તવ્યમેવાપ્યેતિ
યો વક્તવ્યમેવાસ્તમેત્યગ્નિમેવાપ્યેતિ યોઽગ્નિમેવાસ્તમેતિ
કુમારામેવાપ્યેતિ યઃ કુમારામેવાસ્તમેતિ વૈરમ્ભ-
મેવાપ્યેતિ યો વૈરમ્ભમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

હસ્તમેવાપ્યેતિ યો હસ્તમેવાસ્તમેત્યાદાતવ્યમેવાપ્યેતિ
ય આદાતવ્યમેવાસ્તમેતીન્દ્રમેવાપ્યેતિ ય ઇન્દ્રમેવાસ્ત-
મેત્યમૃતામેવાપ્યેતિ યોઽમૃતામેવાસ્તમેતિ મુખ્યમેવાપ્યેતિ
યો મુખ્યમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

પાદમેવાપ્યેતિ યઃ પાદમેવાસ્તમેતિ ગન્તવ્યમેવાપ્યેતિ
યો ગન્તવ્યમેવાસ્તમેતિ વિષ્ણુમેવાપ્યેતિ યો વિષ્ણુમેવાસ્તમેતિ
સત્યામેવાપ્યેતિ યઃ સત્યામેવાસ્તમેત્યન્તર્યામમેવાપ્યેતિ
યોઽન્તર્યામમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

પાયુમેવાપ્યેતિ યઃ પાયુમેવાસ્તમેતિ વિસર્જયિતવ્યમેવાપ્યેતિ
યો વિસર્જયિતવ્યમેવાસ્તમેતિ મૃત્યુમેવાપ્યેતિ યો મૃત્યુમેવાસ્તમેતિ
મધ્યમામેવાપ્યેતિ યો મધ્યમામેવાસ્તમેતિ
પ્રભઞ્જનમેવાપ્યેતિ યઃ પ્રભઞ્જનમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

ઉપસ્થમેવાપ્યેતિ ય ઉપસ્થમેવાસ્તમેત્યાનન્દયિતવ્યમેવાપ્યેતિ
ય આનન્દયિતવ્યમેવાસ્તમેતિ પ્રજાપતિમેવાપ્યેતિ યઃ પ્રજાપતિ-
મેવાસ્તમેતિ નાસીરામેવાપ્યેતિ યો નાસીરામેવાસ્તમેતિ
કુમારમેવાપ્યેતિ યઃ કુમારમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

મન એવાપ્યેતિ યો મન એવાસ્તમેતિ મન્તવ્યમેવાપ્યેતિ
યો મન્તવ્યમેવાસ્તમેતિ ચન્દ્રમેવાપ્યેતિ યશ્ચન્દ્રમેવાસ્તમેતિ
શિશુમેવાપ્યેતિ યઃ શિશુમેવાસ્તમેતિ શ્યેનમેવાપ્યેતિ યઃ
શ્યેનમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

બુદ્ધિમેવાપ્યેતિ યો બુદ્ધિમેવાસ્તમેતિ બોદ્ધવ્યમેવાપ્યેતિ
યો બોદ્ધવ્યમેવાસ્તમેતિ બ્રહ્માણમેવાપ્યેતિ યો
બ્રહ્માણમેવાસ્તમેતિ સૂર્યામેવાસ્તમેતિ યઃ સૂર્યામેવાસ્તમેતિ
કૃષ્ણમેવાપ્યેતિ યઃ કૃષ્ણમેવાસ્તમેતિ વિજ્ઞાનમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

અહઙ્કારમેવાપ્યેતિ યોઽહઙ્કારમેવાસ્તમે-
ત્યહઙ્કર્તવ્યમેવાપ્યેતિ યોઽહઙ્કર્તવ્યમેવાસ્તમેતિ
રુદ્રમેવાપ્યેતિ યો રુદ્રમેવાસ્તમેત્યસુરામેવાપ્યેતિ
યોઽસુરામેવાસ્તમેતિ શ્વેતમેવાપ્યેતિ યઃ શ્વેતમેવાસ્તમેતિ
વિજ્ઞાનમેવાપ્યેતિ તદમૃતમભયમશોકમનન્ત-

નિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

ચિત્તમેવાપ્યેતિ યશ્ચિત્તમેવાસ્તમેતિ ચેતયિતવ્યમેવાપ્યેતિ
યશ્ચેતયિતવ્યમેવાસ્તમેતિ ક્ષેત્રજ્ઞમેવાપ્યેતિ યઃ
ક્ષેત્રજ્ઞમેવાસ્તમેતિ ભાસ્વતીમેવાપ્યેતિ યો ભાસ્વતી-
મેવાસ્તમેતિ નાગમેવાપ્યેતિ યો નાગમેવાસ્તમેતિ વિજ્ઞાન-
મેવાપ્યેતિ યો વિજ્ઞામેવાસ્તમેત્યાનન્દમેવાપ્યેતિ ય
આનન્દમેવાસ્તમેતિ તુરીયમેવાપ્યેતિ યસ્તુરીયમેવાસ્તમેતિ
તદમૃતમભયમશોકમનન્તં નિર્બીજમેવાપ્યેતિ
તદમૃતમભયમશોકમનન્તનિર્બીજમેવાપ્યેતીતિ હોવાચ ॥

ય એવં નિર્બીજં વેદ નિર્બીજ એવ સ ભવતિ ન જાયતે
ન મ્રિયતે ન મુહ્યતે ન ભિદ્યતે ન દહ્યતે ન છિદ્યતે
ન કમ્પતે ન કુપ્સતે સર્વદહનોઽયમાત્મેત્યાચક્ષતે
નૈવમાત્મા પ્રવચનશતેનાપિ લભ્યતે ન બહુશ્રુતેન
ન બુદ્ધિજ્ઞાનાશ્રિતેન ન મેધયા ન વેદૈર્ન યજ્ઞૈર્ન
તપોભિરુગ્રૈર્ન સાંખ્યૈર્ન યોગૈર્નાશ્રમૈર્નાન્યૈરાત્મા-
નમુપુલભન્તે પ્રવચનેન પ્રશંસયા વ્યુત્થાનેન તમેતં
બ્રાહ્મણા શુશ્રુવાંસોઽનૂચાના ઉપલભન્તે શાન્તો
દાન્ત ઉપરતસ્તિતિક્ષુઃ સમાહિતો ભૂત્વાત્મન્યેવાત્માનં
પશ્યતિ સર્વસ્યાત્મા ભવતિ ય એવં વેદ ॥

ઇતિ નવમઃ ખણ્ડઃ ॥ ૯॥

અથ હૈનં રૈક્વઃ પપ્રચ્છ ભગવન્કસ્મિન્સર્વે
સમ્પ્રતિષ્ઠિતા ભવન્તીતિ રસાતલલોકેષ્વિતિ હોવાચ
કસ્મિન્રસાતલલોકા ઓતાશ્ચ પ્રોતાશ્ચેતિ ભૂર્લોકેષ્વિતિ
હોવાચ કસ્મિન્ભૂર્લોકા ઓતાશ્ચ પ્રોતાશ્ચેતિ
ભુવર્લોકેષ્વિતિ હોવાચ કસ્મિન્ભુવર્લોકા ઓતાશ્ચ
પ્રોતાશ્ચેતિ સુવર્લોકેષ્વિતિ હોવાચ કસ્મિન્સુવર્લોકા
ઓતાશ્ચ પ્રોતાશ્ચેતિ મહર્લોકેષ્વિતિ હોવાચ કસ્મિન્મહર્લોકા
ઓતાશ્ચ પ્રોતાશ્ચેતિ જનોલોકેષ્વિતિ હોવાચ કસ્મિન્ જનોલોકા
ઓતાશ્ચ પ્રોતાશ્ચેતિ તપોલોકેષ્વિતિ હોવાચ કસ્મિંસ્તપોલોકા
ઓતાશ્ચ પ્રોતાશ્ચેતિ સત્યલોકેષ્વિતિ હોવાચ કસ્મિન્સત્યલોકા

ઓતાશ્ચ પ્રોતાશ્ચેતિ પ્રજાપતિલોકેષ્વિતિ હોવાચ
કસ્મિન્પ્રજાપતિલોકા ઓતાશ્ચ પ્રોતાશ્ચેતિ બ્રહ્મલોકેષ્વિતિ
હોવાચ કસ્મિન્બ્રહ્મલોકા ઓતાશ્ચ પ્રોતાશ્ચેતિ સર્વલોકા
આત્મનિ બ્રહ્મણિ મણય ઇવૌતાશ્ચ પ્રોતાશ્ચેતિ
સ હોવાચૈવમેતાન્ લોકાનાત્મનિ પ્રતિષ્ઠિતાન્વેદાત્મૈવ
સ ભવતીત્યેતન્નિર્વાણાનુશાસનમિતિ વેદાનુશાસનમિતિ
વેદાનુશાસનમ્ ॥

ઇતિ દશમઃ ખણ્ડઃ ॥ ૧૦॥

અથ હૈનં રૈક્વઃ પપ્રચ્છ ભગવન્વોઽયં
વિજ્ઞાનઘન ઉત્ક્રામન્સ કેન કતરદ્વાવ
સ્થાનમુત્સૃજ્યાપક્રામતીતિ તસ્મૈ સ હોવાચ
હૃદયસ્થ મધ્યે લોહિતં માંસપિણ્ડં
યસ્મિઁઽસ્તદ્દહરં પુણ્ડરીકં કુમુદમિવાનેકધા
વિકસિતં તસ્ય મધ્યે સમુદ્રઃ સમુદ્રસ્ય મધ્યે
કોશસ્તસ્મિન્નાડ્યશ્ચતસ્રો ભવન્તિ રમારમેચ્છાઽપુનર્ભવેતિ
તત્ર રમા પુણ્યેન પુણ્યં લોકં નયત્યરમા પાપેન
પાપમિચ્છયા યત્સ્મરતિ તદભિસમ્પદ્યતે અપુનર્ભવયા
કોશં ભિનત્તિ કોશં ભિત્ત્વા શીર્ષકપાલં ભિનત્તિ
શીર્ષકપાલં ભિત્ત્વા પૃથિવીં ભિનત્તિ પૃથિવીં ભિત્ત્વાપો
ભિનત્ત્યાપો ભિત્ત્વા તેજો ભિનત્તિ તેજો ભિત્ત્વા વાયું ભિનત્તિ વાયું
ભિત્ત્વાકાશં ભિનત્ત્યાકાશં ભિત્ત્વા મનો ભિનત્તિ
મનો ભિત્ત્વા ભૂતાદિં ભિનત્તિ ભૂતાદિં ભિત્ત્વા મહાન્તં
ભિનત્તિ મહાન્તં ભિત્ત્વાવ્યક્તં ભિનત્ત્યવ્યક્તં ભિત્ત્વાક્ષરં
ભિનત્ત્યક્ષરં ભિત્ત્વા મૃત્યું ભિનત્તિ મૃત્યુર્વૈ પરે દેવ
એકીભવતીતિ પરસ્તાન્ન સન્નાસન્ન સદસદિત્યેતન્નિર્વાણા-
નુશાસનમિતિ વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇત્યેકાદશઃ ખણ્ડઃ ॥ ૧૧॥

ૐ નારાયણાદ્વા અન્નમાગતં પક્વં બ્રહ્મલોકે
મહાસંવર્તકે પુનઃ પક્વમાદિત્યે પુનઃ પક્વં
ક્રવ્યાદિ પુનઃ પક્વં જાલકિલક્લિન્નં પર્યુષિતં

પૂતમન્નમયાચિતમસંક્લૃપ્તમશ્નીયાન્ન કંચન યાચેત ॥

ઇતિ દ્વાદશઃ ખણ્ડઃ ॥ ૧૨॥

બાલ્યેન તિષ્ઠાસેદ્બાલસ્વભાવોઽસઙ્ગો નિરવદ્યો
મૌનેન પાણ્ડિત્યેન નિરવધિકારતયોપલભ્યેત
કૈવલ્યમુક્તં નિગમનં પ્રજાપતિરુવાચ મહત્પદં
જ્ઞાત્વા વૃક્ષમૂલે વસેત કુચેલોઽસહાય એકાકી
સમાધિસ્થ આત્મકામ આપ્તકામો નિષ્કામો
જીર્ણકામો હસ્તિનિ સિંહે દંશે મશકે નકુલે
સર્પરાક્ષસગન્ધર્વે મૃત્યો રૂપાણિ વિદિત્વા ન બિભેતિ
કુતશ્ચનેતિ વૃક્ષમિવ તિષ્ઠાસેચ્છિદ્યમાનોઽપિ
ન કુપ્યેત ન કમ્પેતોત્પલમિવ તિષ્ઠાસેચ્છિદ્યમાનોઽપિ
ન કુપ્યેત ન કમ્પેતાકાશમિવ તિષ્ઠાસેચ્છિદ્યમાનોઽપિ
ન કુપ્યેત ન કમ્પેત સત્યેન તિષ્ઠાસેત્સત્યોઽયમાત્મા
સર્વેષામેવ ગન્ધાનાં પૃથિવી હૃદયં સર્વેષામેવ
રસાનામાપો હૃદયં સર્વેશામેવ રૂપાણાં તેજો
હૃદયં સર્વેષામેવ સ્પર્શાનાં વાયુર્હૃદયં
સર્વેષામેવ શબ્દાનામાકાશં હૃદયં સર્વેષામેવ
ગતીનામવ્યક્તં હૃદયં સર્વેષામેવ સત્ત્વાનાં
મૃત્યુર્હૃદયં મૃત્યુર્વૈ પરે દેવ એકીભવતીતિ પરસ્તાન્ન
સન્નાસન્ન સદસદિત્યેતન્નિર્વાણાનુશાસનમિતિ
વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ ત્રયોદશઃ ખણ્ડઃ ॥ ૧૩॥

ૐ પૃથિવી વાન્નમાપોઽન્નાદા આપો વાન્નં
જ્યોતિરન્નાદં જ્યોતિર્વાન્નં વાયુરન્નાદો
વાયુર્વાન્નમાકાશોઽન્નાદ આકાશો
વાન્નમિન્દ્રિયાણ્યન્નાદાનીન્દ્રિયાણિ વાન્નં
મનોઽન્નાદં મનો વાન્નં બુદ્ધિરન્નાદા
બુદ્ધિર્વાન્નમવ્યક્તમન્નદમવ્યક્તં
વાન્નમક્ષરમન્નાદમક્ષરં વાન્નં
મૃત્યુરન્નાદો મૃત્યુર્વૈ પરે દેવ એકીભવતીતિ

પરસ્તાન્ન સન્નાસન્ન સદસદિત્યેતન્નિર્વાણા-
નુશાસનમિતિ વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ ચતુર્દશઃ ખણ્ડઃ ॥ ૧૪॥

અથ હૈનં રૈક્વઃ પપ્રચ્છ ભગવન્યોઽયં
વિજ્ઞાનઘન ઉત્ક્રામન્સ કેન કતરદ્વાવ
સ્થાનં દહતીતિ તસ્મૈ સ હોવાચ યોઽયં
વિજ્ઞાનઘન ઉત્ક્રામન્પ્રાણં દહત્યપાનં
વ્યાનમુદાનં સમાનં વૈરમ્ભં મુખ્ય-
મન્તર્યામં પ્રભઞ્જનં કુમારં શ્યેનં
શ્વેતં કૃષ્ણં નાગં દહતિ પૃથિવ્યાપસ્તેજો-
વ્યાકાશં દહતિ જાગરિતં સ્વપ્નં સુષુપ્તં
તુરીયં ચ મહતાં ચ લોકં પરં ચ લોકં
દહતિ લોકાલોકં દહતિ ધર્માધર્મં દહત્યભાસ્કર-
મમર્યાદં નિરાલોકમતઃ પરં દહતિ મહાન્તં
દહત્યવ્યક્તં દહત્યક્ષરં દહતિ મૃત્યું દહતિ
મૃત્યુર્વૈ પરે દેવ એકીભવતીતિ પરસ્તાન્ન સન્નાસન્ન
સદસદિત્યેતન્નિર્વાણાનુશાસનમિતિ વેદાનુશાસનમિતિ
વેદાનુશાસનમ્ ॥

ઇતિ પઞ્ચદશઃ ખણ્ડઃ ॥ ૧૫॥

સૌબાલબીજબ્રહ્મોપનિષન્નાપ્રશાન્તાય
દાતવ્યા નાપુત્રાય નાશિષ્યાય નાસંવત્સર-
રાત્રોષિતાય નાપરિજ્ઞાતકુલશીલાય દાતવ્યા નૈવ
ચ પ્રવક્તવ્યા । યસ્ય દેવે પરા ભક્તિર્યથા દેવે
તથા ગુરૌ । તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે
મહાત્મન ઇત્યેતન્નિર્વાણાનુશાસનમિતિ
વેદાનુશાસનમિતિ વેદાનુશાસનમ્ ॥

ઇતિ ષોડશઃ ખણ્ડઃ ॥ ૧૬॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ સુબાલોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

*Subala Upanishad*
pdf was typeset on August 25, 2020

Please send corrections to *sanskrit@cheerful.com*